# मेधासूक्तम्

# Medhāsūktam

ॐ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय॥ ॐ शान्तिः शान्तिः शान्तिः ॥

**Om yaśchandasāmṛṣabho viśvarūpaḥ| chandobhyo'dhyamṛtātsambabhūva| sa mendro medhayā spṛṇotu | amṛtasya devadhāraṇo bhūyāsam | śarīraṁ me vicarṣaṇam | jihvā me madhumattamā | karṇābhyāṁ bhūriviśruvam | brahmaṇaḥ kośo'si medhayā pihitaḥ | śrutaṁ me gopāya | Om śāntiḥ śāntiḥ śāntiḥ ||**

ॐ मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना। त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया। त्वया जुष्टश्चित्रं विन्दते वसु सानो जुषस्व द्रविणो न मेधे॥

**Om medhādevī juṣamāṇā na āgādviśvācī bhadrā sumanasyamānā | tvayā juṣṭā nudamānā duruktān bṛhadvadema vidathe suvīrāḥ | tvayā juṣṭa ṛṣirbhavati devi tvayā brahmā''gataśrīruta tvayā | tvayā juṣṭaścitraṁ vindate vasu sāno juṣasva draviṇo na medhe ||**

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती। मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा। अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः। दैवीं मेधा सरस्वती सा मां मेधा सुरभि- र्जुषताग् स्वाहा॥

**medhāṁ ma indro dadātu medhāṁ devī sarasvatī | medhāṁ me aśvināvubhāvādhattāṁ puṣkarasrajā | apsarāsu ca yā medhā gandharveṣu ca yanmanaḥ | daivīṁ medhā sarasvatī sā māṁ medhā surabhi-rjuṣatāg svāhā ||**

आमां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥

**āmāṁ medhā surabhirviśvarūpā hiraṇyavarṇā jagatī jagamyā । ūrjasvatī payasā pinvamānā sā māṁ medhā supratīkā juṣantām ||**

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु  मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ ॐ हंस हंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयात् ॥

**mayi medhāṁ mayi prajāṁ mayyagnistejo dadhātu mayi medhāṁ mayi prajāṁ mayīndra indriyaṁ dadhātu  mayi medhāṁ mayi prajāṁ mayi sūryo bhrājo dadhātu ||**
**Om  haṁsa  haṁsāya vidmahe paramahaṁsāya dhīmahi । tanno haṁsaḥ pracodayāt ||**

ॐ शान्तिः शान्तिः शान्तिः ॥

**Om śāntiḥ śāntiḥ śāntiḥ ||**